# শ্রীদত্তাপরাধক্ষমাপণস্তোত্রম্

{॥ শ্রীদত্তাপরাধক্ষমাপণস্তোত্রম্ ॥}

দত্তাত্রেযং ত্বাং নমামি প্রসীদ ত্বং সর্বাত্মা সর্বকর্তা ন বেদ ।

কোঽপ্যন্তং তে সর্বদেবাধিদেব জ্ঞাতাঽজ্ঞাতান্মেঽপরাধান্ ক্ষমস্ব ॥ ১॥

ত্বদুদ্ভবত্বাত্ত্বদধীনধীত্বাত্ত্বমেব মে বন্দ্য উপাস্য আত্মন্ ।

অথাপি মৌঢ্যাত্ স্মরণং ন তে মে কৃতং ক্ষমস্ব প্রিযকৃন্মহাত্মন্ ॥ ২॥

ভোগাপবর্গপ্রদমার্তবংধুং কারুণ্যসিন্ধুং পরিহায বন্ধুম্ ।

হিতায চাঽন্যং পরিমার্গযন্তি হা মাদৃশো নষ্টদৃশো বিমূঢাঃ ॥ ৩॥

ন মৎসমো যদ্যপি পাপকর্তা ন ত্বৎসমোঽথাপি হি পাপহর্তা ।

ন মৎসমোঽন্যো দযনীয আর্য ন ত্বৎসমঃ ক্বাপি দযালুবর্যঃ ॥ ৪॥

অনাথনাথোঽসি সুদীনবন্ধো শ্রীশাঽনুকম্পামৃতপূর্ণসিন্ধো ।

ত্বৎপাদভক্তিং তব দাসদাস্যং ত্বদীযমংত্রার্থদৃঢৈকনিষ্ঠাম্ ॥ ৫॥

গুরুস্মৃতিং নির্মলবুদ্ধিমাধিব্যাধিক্ষযং মে বিজয চ দেহি ।

ইষ্টার্থসিদ্ধিং বরলোকবশ্যং ধনান্নবৃদ্ধিং বরগোসমৃদ্ধিম্ ॥ ৬॥

পুত্রাদিলব্ধিং ম উদারতাং চ দেহীশ মে চাস্ত্বভয হি সর্বতঃ ।

Stotram Digitalized By Sanskritdocuments.org

ব্রহ্মা-ঽগ্নি-ভূম্যো নম ওষধীভ্যো বাচে নমো বাক্পতয়ে চ বিষ্ণবে ॥ ৭॥

শান্তাঽস্তু ভূর্নঃ শিবমন্তরিক্ষ দ্যৌশ্চাঽভযং নোঽস্তু দিশ শিবাশ্চ ।

আপশ্চ বিদ্যুৎপরিপান্তু দেবাঃ শ সর্বতো মেঽভযমস্তু শান্তিঃ ॥ ৮॥

॥ইতি শ্রীবাসুদেবানন্দসরস্বতীবিরচিতং

দত্তাপরাধক্ষমাপণস্তোত্রং সম্পূর্ণম্ ॥

Proofread by Arvind Kolhatkar akolhatkar at rogers.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Datta Aparadha Kshamapana Stotram Lyrics in Bengali PDF
% File name : dattaaparaadhakshamaa.itx
% Category : aparAdhakShamA
% Location : doc_deities_misc
% Author : vAsudevAnandasarasvatI
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : WebD
% Proofread by : Arvind Kolhatkar akolhatkar at rogers.com
% Latest update : January 18, 2005
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%

% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website